॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय १९

स वानरमहाराजः शयानः शरविक्षतः ।
प्रत्युक्तो हेतुमद्वाक्यैर्नोत्तरं प्रत्यपद्यत ॥ १॥

अश्मभिः परिभिन्नाङ्गः पादपैराहतो भृशम् ।
रामबाणेन चाक्रान्तो जीवितान्ते मुमोह सः ॥ २॥

तं भार्याबाणमोक्षेण रामदत्तेन संयुगे ।
हतं प्लवगशार्दूलं तारा शुश्राव वालिनम् ॥ ३॥

सा सपुत्राप्रियं श्रुत्वा वधं भर्तुः सुदारुणम् ।
निष्पपात भृशं त्रस्ता विविधाद्गिरिगह्वरात् ॥ ४॥

ये त्वङ्गदपरीवारा वानरा हि महाबलाः ।
ते सकार्मुकमालोक्य रामं त्रस्ताः प्रदुद्रुवुः ॥ ५॥

सा ददर्श ततस्त्रस्तान्हरीनापततो द्रुतम् ।
यूथादिव परिभ्रष्टान्मृगान्निहतयूथपान् ॥ ६॥

तानुवाच समासाद्य दुःखितान्दुःखिता सती ।
राम वित्रासितान्सर्वाननुबद्धानिवेषुभिः ॥ ७॥

वानरा राजसिंहस्य यस्य यूयं पुरःसराः ।
तं विहाय सुविस्त्रस्ताः कस्माद्द्रवत दुर्गताः ॥ ८॥

राज्यहेतोः स चेद्भ्राता भ्राता रौद्रेण पातितः ।
रामेण प्रसृतैर्दूरान्मार्गणैर्दूर पातिभिः ॥ ९॥

कपिपत्न्या वचः श्रुत्वा कपयः कामरूपिणः ।
प्राप्तकालमविक्लिष्टमूचुर्वचनमङ्गनाम् ॥ १०॥

जीव पुत्रे निवर्तस्य पुत्रं रक्षस्व चान्दगम् ।
अन्तको राम रूपेण हत्वा नयति वालिनम् ॥ ११॥

क्षिप्तान्वृक्षान्समाविध्य विपुलाश्च शिलास्तथा ।
वाली वज्रसमैर्बाणैर्वज्रेणेव निपातितः ॥ १२॥

अभिद्रुतमिदं सर्वं विद्रुतं प्रसृतं बलम् ।
अस्मिन्प्लवगशार्दूले हते शक्रसमप्रभे ॥ १३॥

रक्ष्यतां नगरं शूरैरङ्गदश्चाभिषिच्यताम् ।
पदस्थं वालिनः पुत्रं भजिष्यन्ति प्लवङ्गमाः ॥ १४॥

अथ वा रुचिरं स्थानमिह ते रुचिरानने ।
आविशन्ति हि दुर्गाणि क्षिप्रमद्यैव वानराः ॥ १५॥

अभार्याः सह भार्याश्च सन्त्यत्र वनचारिणः ।
लुब्धेभ्यो विप्रयुक्तेभ्यः स्वेभ्यो नस्तुमुलं भयम् ॥ १६॥

अल्पान्तरगतानां तु श्रुत्वा वचनमङ्गना ।
आत्मनः प्रतिरूपं सा बभाषे चारुहासिनी ॥ १७॥

पुत्रेण मम किं कार्यं किं राज्येन किमात्मना ।
कपिसिंहे महाभागे तस्मिन्भर्तरि नश्यति ॥ १८॥

पादमूलं गमिष्यामि तस्यैवाहं महात्मनः ।
योऽसौ रामप्रयुक्तेन शरेण विनिपातितः ॥ १९॥

एवमुक्त्वा प्रदुद्राव रुदती शोककर्शिता ।
शिरश्चोरश्च बाहुभ्यां दुःखेन समभिघ्नती ॥ २०॥

आव्रजन्ती ददर्शाथ पतिं निपतितं भुवि ।
हन्तारं दानवेन्द्राणां समरेष्वनिवर्तिनाम् ॥ २१॥

क्षेप्तारं पर्वतेन्द्राणां वज्राणामिव वासवम् ।
महावातसमाविष्टं महामेघौघनिःस्वनम् ॥ २२॥

शक्रतुल्यपराक्रान्तं वृष्ट्वेवोपरतं घनम् ।
नर्दन्तं नर्दतां भीमं शूरं शूरेण पातितम् ॥ २३॥

शार्दूलेनामिषस्यार्थे मृगराजं यथा हतम् ।
अर्चितं सर्वलोकस्य सपताकं सवेदिकम् ॥ २४॥

नागहेतोः सुपर्णेन चैत्यमुन्मथितं यथा ।
अवष्टभ्यावतिष्ठन्तं ददर्श धनुरूर्जितम् ॥ २५॥

रामं रामानुजं चैव भर्तुश्चैवानुजं शुभा ।

तानतीत्य समासाद्य भर्तारं निहतं रणे ॥ २६ ॥

समीक्ष्य व्यथिता भूमौ सम्भ्रान्ता निपपात ह ।
सुप्तेव पुनरुत्थाय आर्यपुत्रेति क्रोशती ॥ २७ ॥

रुरोद सा पतिं दृष्ट्वा सन्दितं मृत्युदामभिः ।

तामवेक्ष्य तु सुग्रीवः क्रोशन्तीं कुररीम् इव ॥ २८ ॥

विषादमगमत्कष्टं दृष्ट्वा चाङ्गदमागतम् ॥ २९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com